# Brahmaproktah Surya Stavaraja

# ब्रह्मप्रोक्तः सूर्यस्तवराजः

## Document Information

Text title : Brahmaproktah Surya Stavaraja

File name : brahmaproktaHsUryastavarAjaH.itx

Category : navagraha, brahmavaivartapurANa, stavarAja

Location : doc_z_misc_navagraha

Proofread by : PSA Easwaran

Description/comments : brahmavaivartapurANa | gaNapatikhaNDa | adhyAya 19/37-44||

Latest update : March 5, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

March 5, 2025

*sanskritdocuments.org*

# ब्रह्मप्रोक्तः सूर्यस्तवराजः

ब्रह्मोवाच ।
तं ब्रह्म परमं धाम ज्योतीरूपं सनातनम् ।
त्वामहं स्तोतुमिच्छामि भक्तानुग्रहकारकम् ॥ ३६॥

त्रैलोक्यलोचनं लोकनाथं पापविमोचनम् ।
तपसां फलदातारं दुःखदं पापिनां सदा ॥ ३७॥

कर्मानुरूपफलदं कर्मबीजं दयानिधिम् ।
कर्मरूपं क्रियारूपमरूपं कर्मबीजकम् ॥ ३८॥

ब्रह्मविष्णुमहेशानामंशं च त्रिगुणात्मकम् ।
व्याधिदं व्याधिहन्तारं शोकमोहभयापहम् ।
सुखदं मोक्षदं सारं भक्तिदं सर्वकामदम् ॥ ३९॥

सर्वेश्वरं सर्वरूपं साक्षिणं सर्वकर्मणाम् ।
प्रत्यक्षं सर्वलोकानामप्रत्यक्षं मनोहरम् ॥ ४०॥

शश्वद्रसहरं पश्चाद्रसदं सर्वसिद्धिदम् ।
सिद्धिस्वरूपं सिद्धेशं सिद्धानां परमं गुरुम् ॥ ४१॥

स्तवराजमिदं प्रोक्तं गुह्याद्गुह्यतरं परम् ।
त्रिसन्ध्यं यः पठेन्नित्यं व्याधिभ्यस्स प्रमुच्यते ॥ ४२॥

आन्ध्यं कुष्ठं च दारिद्र्यं रोगः शोको भयं कलिः ।
तस्य नश्यति विश्वेश श्रीसूर्यकृपया ध्रुवम् ॥ ४३॥

महाकुष्ठी च गलितश्चक्षुर्हीनो महाव्रणी ।
यक्ष्मग्रस्तो महाशूली नानाव्याधियुतोऽपि वा ॥ ४४॥

मासं कृत्वा हविष्यान्नं श्रुत्वाऽतो मुच्यते ध्रुवम् ।
स्नानं च सर्वतीर्थानां लभते नात्र संशयः ॥ ४५॥

पुष्करं गच्छतं शीघ्रं भास्करं भजतं सुतौ ।
इत्येवमुक्त्वा स विधिर्जगाम स्वालयं मुदा ॥ ४६॥

तौ निषेव्य दिनेशं तं नीरुजौ सम्बभूवतुः ।

इति श्रीब्रह्मवैवर्तपुराणे गणपतिखण्डे एकोनविंशाध्यायान्तर्गतः
ब्रह्मप्रोक्तः सूर्यस्तवराजः समाप्तः ।

ब्रह्मवैवर्तपुराण । गणपतिखण्ड । अध्याय १९/३७-४४॥

brahmavaivartapurANa . gaNapatikhaNDa . adhyAya 19/37-44..

Proofread by PSA Easwaran

*Brahmaproktah Surya Stavaraja*

pdf was typeset on March 5, 2025

Please send corrections to *sanskrit@cheerful.com*